॥ महा नारायणोपनिषत् ॥
॥ हरिः ओं ॥
सहस्र शीर्षं देवं विश्वाक्षं विश्वशंभुवं ।
विश्वं नारायणं देवमक्षरं परमं पदं ॥
विश्वतः परमान्नित्यं विश्वं नारायणग् हरिम् ।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति ॥
पतिं विश्वस्यात्मेश्वरग्   शाश्वतग् शिवमच्युतं ।
नारायणं महाज्ञेयं विश्वात्मानं परायणम् ॥
नारायण परोज्योति रात्मा नारायणः परः ।
नारायण परंब्रह्मतत्त्वं नारायणः परः ॥
नारायण परो ध्याता ध्यानं नारायणः परः ।
यच्चकिंचि ज्जगत् सर्वं दृश्यते श्रूयते पि वा ॥
अंतर्बहिश्चतत्सर्वं व्याप्य नारायणः स्थितः ।
अनंतमव्ययं कविग् समुद्रेंतं विश्वशंभुवम् ॥
पद्मकोश प्रतीकाशग् हृदयं चाप्यधोमुखम् ।
अधो निष्ट्यावितस्त्यांते नाभ्यामुपरि तिष्ठति ॥
ज्वालमालाकुलं भाति विश्वस्यायतनं महत् ।
संततग् शिलाभिस्तु लंबत्याकोशसन्निभं ॥
तस्यान्ते सुषिरग्   सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम् ।
तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः ॥
सोग्रभुग् विभजंतिष्ठन्नाहारमजरः कविः ।
तिर्यगूर्ध्व मधश्यायी रश्मय स्तस्य संतताः ॥
संतापयति स्वंदेहमापाद तलमस्तकः ।
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः ॥
नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा ।
नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा ॥
तस्याश्शिखाया मध्ये परमात्माव्यवस्थितः ।
स ब्रह्म स शिवस्सहरिस्सेंद्रस्सोक्षरः परमः स्वराट् ॥
ओं तद्ब्रह्म । ओं तद्वायुः । ओं तदात्मा । ओं तत्सत्यं । ओं तत्सर्वं ।
ओं तत्पुरोर्नमः । अंतश्चरति भूतेषु गुहायां विश्व मूर्तिषु ।
त्वं यज्ञस्त्वंवषट्कारस्त्वमिंद्रस्त्वग्ंरुद्रस्त्वंविष्णुस्त्वं ब्रह्म त्वं प्रजापतिः ।

त्वं तदाप आपोज्योतीरसोमृतं ब्रह्मभूर्भुवःसुवरों ॥
( ऋतगं् सत्यं परं ब्रह्मपुरुषं कृष्णपिंगलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥ )
ओं नारायणय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥
॥ श्रीकृष्णार्पणमस्तु